# वार्षिकपरीक्षा, 2018-2019

## संस्कृतम्

**अवधिः - होरात्रयम्** **कक्षा - नवमी** **पूर्णांकाः - अशीतिः**

**विद्यार्थिनः नाम .................................................................................. वर्गः ....... दिनांकः - 11.2.2019 (सोमवासरः)**

**निर्देशाः -**

- **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
  - ✓ **खण्डः क - अपठितावबोधनम् - 05 अंकाः**
  - ✓ **खण्डः ख - रचनात्मक कार्यम् - 15 अंकाः**
  - ✓ **खण्डः ग - अनुप्रयुक्त व्याकरणम् -25 अंकाः**
  - ✓ **खण्डः घ - पठितावबोधनम् - 35 अंकाः**
- **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
- **प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।**
- **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**

## खण्डः - क (अपठितांश-अवबोधनम् - 05 अंकाः)

**प्र.1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -**

ऐश्वर्यमारोग्यम् भौतिकं सुखं आदि किञ्चिदपि वस्तु धनेन विना लब्धुं नैव शक्यते । यज्ञाः, दानम्, उत्सवाः, गृहस्थसंचालनं वा सर्वमपि कार्यजातं धनेनैव संपद्यते । न केवलमस्मिन्नेव अपितु वेदेऽपि वित्तस्य माहात्म्यं दृश्यते । धनेनैव बलं, पाण्डित्यं, प्रभुत्वं च लभ्यन्ते । यस्य समीपे धनं वर्तते तस्य जीवनयात्रा सुचारुरूपेण चलति किन्तु यस्य समीपे धनं नास्ति तस्य जीवनयात्रा तु दुःखकरी दृश्यते । धनेन सर्वाणि कष्टानि दूरी भवन्ति । कथितमपि - 'धर्मष्टका कर्मष्टका टका एव परमं पदम् । यस्य गृहे टका नास्ति हा ! टका टकटकायते ।।' अर्थात् संसारेऽस्मिन् 'टका' अर्थात् धनमेव धर्मः, धनमेव कर्म अस्ति । एवं संसारे सर्वोच्चं पदं धनं धनेन वा अस्ति । परं यस्य नरस्य समीपे धनं न भवति, सः अहर्निशं अन्यं प्रति दुर्बलः भूत्वा केवलं विवशतया पश्यति एव । अतः कथितम्-'धनमेव सर्वं वर्तते ।'

**क) एकपदेन उत्तरत -** **(½×2=1)**

अ) धनेन किं दूरी भवति ?

ब) संसारे सर्वोच्चं पदं किं अस्ति ?

**ख) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

अ) धनेन किम्-किम् संपद्यते ?

ब) अस्मिन् संसारे कः धर्मः अस्ति ?

**ग) भाषिककार्यम् -** **(½×4=2)**

अ) अनुच्छेदे 'माहात्म्यम्' इति कर्तृपदस्य क्रियापदं किम् ?

(i) चलति (ii) भवन्ति

(iii) दृश्यते (iv) लभ्यते

ब) 'वेदा: अपि धनस्य महत्त्वं गायन्ति ।' अस्मिन् वाक्ये कर्तृपदं किम् ?

(i) गायन्ति (ii) वेदा: (iii) धनस्य (iv) अपि

स) 'प्राप्तुम्' इति पदस्य अर्थे क: शब्द: प्रयुक्त: ?

(i) गन्तुम् (ii) श्रोतुम् (iii) चलितुम् (iv) लब्धुम्

द) 'सर्वाणि कष्टानि' अत्र विशेषणपदं किम् ?

## खण्ड: - ख (रचनात्मककार्यम् - 15 अंका:)

**प्र.2 मञ्जूषाया: प्रदत्तपदानां सहायतया शुल्कक्षमार्थं प्रधानाचार्यं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुन: उत्तरपुस्तिकायां लिखत ।** **(½x10=5)**

परीक्षाभवनम्

तिथि: 11.02.2019

सेवायाम्

मान्या: (1)....................

ओ. पी. जिंदल विद्यालय:

रायगढ़नगरम् ।

(2)....................

सविनयं (3)................... अस्ति यत् मम पिता एकस्मिन् (4).......... लिपिक: अस्ति । तस्य परिमिते वेतने परिवारस्य पञ्च सदस्यानां निर्वाह: (5)................... क्रियते । विद्यालयस्य (6)................ तु असम्भवम् एव । (7)................... मम अध्ययने (8)................... न स्यात् अत: मम शुल्कं क्षमां कृत्वा अनुग्रहं कुर्वन्तु भवन्त: ।

(9)................... ।

भवताम् (10)....................

क. ख. ग.

नवमी श्रेणी

**मञ्जूषा -**

| |
|---|
| कठिनतया, सधन्यवादम्, महोदय !, निवेदनम्, आज्ञाकारी शिष्य:, प्रधानाचार्यमहोदया:, व्यवधानम्, कार्यालये, धनाभावे, शुल्कप्रदानम् |

**प्र.3 मञ्जूषायां प्रदत्तै: पदै: सहायतया चित्रस्य वर्णनं पञ्चसु संस्कृतवाक्येषु कुरुत -** **(1×5=5)**



**मञ्जूषा -**

| |
|---|
| सरोवर:, त्रय: जना:, खगा:, अत्र, एतत् चित्रम्, वृक्षेषु, मीना:, वनस्य, पत्राणि, तरन्ति, कलरवम्, वने, स्नानम्, कुर्वन्ति, कूजन्ति, उपतिष्ठन्ति, अस्ति, पुष्पाणि, विकसन्ति |

प्र.4 **अधोलिखितानां वाक्यानां संस्कृतेन अनुवादं कुरुत -** **(1×5=5)**

क) विद्यालय के चारों ओर उद्यान है। ख) छात्र गुरु को प्रणाम करते हैं।

ग) माता पुत्र से स्नेह करती है। घ) सीता राम के साथ वन गईं थीं।

ड.) तुम यह पुस्तक कब पढ़ोगे ?

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अंकाः)

प्र.5 **क) अधोलिखितानाम् प्रश्नानाम् उत्तराणि लिखत -** **(1×2=2)**

अ) 'अ' वर्णस्य उच्चारणस्थानं किम् ?

ब) 'नयने' इति पदे कस्य वर्णस्य उच्चारणस्थानम् तालुः अस्ति ?

**ख) अधोलिखितशब्दस्य वर्णविन्यासम् उचितेन वर्णेन पूरयत -** **(½×2=1)**

कृषकः - क् + ........ + ष् + अ + क् + अः

**ग) वर्णसंयोजनं कुरुत -**

ह् + इ + म् + आ + च् + छ् + आ + द् + इ + त् + अः .............।

प्र.6 **रेखांकितपदानां सन्धिच्छेदं सन्धिं वा कृत्वा लिखत -** **(1×4=4)**

क) <u>न + अनृतं</u> ब्रूयात्।

ख) <u>निर् + रसं</u> वाक्यं न वदनीयम्।

ग) जनाः <u>जगदम्बां</u> पूजयन्ति।

घ) <u>सहसैव</u> वृष्टिरागता।

प्र.7 **उचितैः शब्दरूपैः रिक्तस्थानानि पूरयत -** **(1×6=6)**

क) मम .............. मित्राणि सन्ति। (चतुर्)

ख) .............. कार्यालयः अत्रैव अस्ति। (रमा)

ग) कालाः .............. भवन्ति। (त्रि)

घ) प्राचार्यः .............. उपहारान् यच्छति। (छात्र)

ड.) पत्रवाहकः .............. वितरन्ति। (पत्र)

च) अहम् .............. जलम् आनयामि। (हरि)

प्र.8 **उचितैः धातुरुपैः रिक्तस्थानानि पूरयत -** **(1×3=3)**

क) अहं श्वः पाठं ..............। (पठ्)

ख) प्रतापः देशभक्तः ..............। (अस् - लङ्.लकारे)

ग) ये परिश्रमं कुर्वन्ति, ते सफलतां ..............। (लभ् - लट्लकारे)

प्र.9 **कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपेण वाक्यानि पूरयत -** **(1×4=4)**

क) ............... गङ्.गा श्रेष्ठा वर्तते। (नदी)

ख) सः ............... प्रवीणः अस्ति। (व्याकरण)

ग) पिता ............... कुप्यति। (पुत्र)

घ) सा ............... सह आपणं गच्छति। (पितृ)

प्र.10 रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत - (1×3=3)

क) राधा <u>विहस्य</u> अवदत् ।

ख) अहम् फलानि <u>आ + नी + तुमुन्</u> आपणं गच्छामि ।

ग) स: पुस्तकम् <u>लभ् + क्त्वा</u> प्रसीदति ।

प्र.11 अधोलिखितवाक्येषु रेखांकितपदेभ्य: उपसर्गं धातुं च पृथक कृत्वा लिखत - (½×4=2)

क) बालक: पितरम् <u>अनुकरोति</u> । ख) शिष्य: गुरुम् <u>उपगच्छति</u> ।

ग) मह्यं तण्डुलमूल्यं <u>प्रयच्छ</u> । घ) पुत्र: मातरम् <u>प्रणमति</u> ।

## <u>खण्ड: - घ (पठितावबोधनम् - 35 अंका:)</u>

प्र.12 अधोलिखितम् गद्यांशम्, पद्यांशम्, नाट्यांशम् च पठित्वा प्रश्नानाम् उत्तराणि लिखत -

**क)** परंतु स्वार्थान्धो मानवस्तदेव पर्यावरणमद्य नाशयति । स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति। यन्त्रागाराणां विषाक्तं जलं नद्यां निपात्यते येन मत्स्यादीनां जलचराणां च क्षणेनैव नाशो जायते। नदीजलमपि तत्सर्वथाऽपेयं जायते। वनवृक्षा निर्विवेकं छिद्यन्ते व्यापारवर्धनाय, येन अवृष्टि: प्रवर्धते, वनपशवश्च शरणरहिता ग्रामेषु उपद्रवं विदधति । शुद्धवायुरपि वृक्षकर्तनात् संकटापन्नो जात:। एवं हि स्वार्थान्धमानवैर्विकृतिमुपगता प्रकृतिरेव तेषां विनाशकर्त्री सञ्जाता । पर्यावरणे विकृतिमुपगते जायन्ते विविधा रोगा भीषणसमस्याश्च तत्सर्वमिदानीं चिन्तनीयं प्रतिभाति ।

अ) एकपदेन उत्तरत - (1×2=2)

(i) कीदृश: मानव: पर्यावरणमद्य नाशयति ?

(ii) कस्या: जलं सर्वथा अपेयं जायते ?

ब) पूर्णवाक्येन उत्तरत - (1×2=2)

(i) वृक्षकर्तनात् क: संकटापन्नो जात: ?

(ii) पर्यावरणे विकृतिमुपगते कानि जायन्ते ?

स) भाषिककार्यम् - (½×4=2)

(i) 'बहुलाभाय' शब्दस्य विपर्ययपदं अत्र किम् प्रयुक्तम् ?

(ii) 'विविधा: रोगा:' अनयो: विशेष्यपदं किम् ?

(iii) 'सञ्जाता' इति क्रियापदस्य कर्तृपदं किम् ?

(a) विनाशकर्त्री (b) प्रकृति: (c) प्रकृतिरेव (d) मानवै:

(iv) 'येन' इति सर्वनामपदं गद्यांशे कस्मै प्रयुक्तम् ?

(a) विषाक्तजलम् (b) विषाक्तजले (c) विषाक्तजलाय

**ख)** तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबल: ।

चकार बहुधा गात्रे व्रणान्पतगसत्तम: ।।

अ) एकपदेन उत्तरत - (1×2=2)

(i) महाबल: क: आसीत् ?

(ii) पतगसत्तम: क: ?

ब) **पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(i) जटायु: कस्य गात्रे व्रणान् चकार ?

(ii) जटायो: नखा: कीदृशा: आसन् ?

स) **भाषिककार्यम् -** **(½×4=2)**

(i) 'दुर्बल:' इति पदस्य किम् विलोमपदं अत्र प्रयुक्तम् ?

(ii) 'तीक्ष्णनखाभ्यां चरणाभ्याम्' अनयो: विशेषणपदं किम् ?

(iii) 'चकार बहुधा गात्रे व्रणान्पतगसत्तम: इत्यस्मिन् वाक्ये क्रियापदम् किम् ?

(a) बहुधा (b) गात्रे (c) चकार (d) व्रणान्

(iv) 'शरीरे' इति पदस्य किम् पर्यायपदं अत्र प्रयुक्तम् ?

(a) बहुधा (b) गात्रे (c) तस्य (d) व्रणान्

ग) श्वेतकेतु: - सम्यगवगतं भगवन् ।

आरुणि: - वत्स ! पीयमानानाम् अपां योऽणिमा, स ऊर्ध्व: समुदीषति । सा खलु वाग्भवति । वत्स ! उपदेशान्ते भूयोऽपि त्वां विज्ञापयितुमिच्छामि यदन्नमयं भवति मन:, आपोमयो भवति प्राणस्तेजोमयी च भवति वागिति । किञ्च यादृशमन्नादिकं गृह्णाति मानवस्तादृशमेव तस्य चित्तादिकं भवतीति मदुपदेशसार:। वत्स ! एतत्सर्वं हृदयेन अवधारय ।

श्वेतकेतु: - यदाज्ञापयति भगवन् । एष प्रणमामि ।

आरुणि: - वत्स ! चिरंजीव । तेजस्विनावधीतमस्तु ।

अ) **एकपदेन उत्तरत -** **(1×2=2)**

(i) क: सम्यक् अवगच्छति ?

(ii) 'चिरंजीव' इति क: कथयति ?

ब) **पूर्णवाक्येन उत्तरत -** **(1×2=2)**

(i) आरुणे: उपदेशस्य सार: किम् अस्ति ?

(ii) मन: कीदृशं भवति ?

स) **भाषिक कार्यम् -** **(½×4=2)**

(i) 'पठितम्' इति पदस्य किम् पर्यायपदं अत्र प्रयुक्तम् ?

(ii) नाट्यांशे 'अध:' पदस्य क: विपर्यय: आगत: ?

(iii) 'भवतीति मदुपदेशसार:' अत्र 'मत्' पदम् कस्मै प्रयुक्तम् ?

(a) श्वेतकेतवे (b) साधवे (c) आरुणये (d) मनसे

(iv) 'यादृशं अन्नादिकं गृह्णाति मानव:' इति वाक्ये कर्तृपदं किम् ?

(a) गृह्णाति (b) अन्नादिकं (c) मानव: (d) यादृशं

**प्र.13 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** **(1×5=5)**

क) <u>जगति</u> मूर्खाणाम् अभाव: नास्ति ।

ख) वृक्षाणां फलानि अपि <u>परार्थाय</u> भवन्ति ।

ग) अभिमन्यु: सर्वान् प्रणमति ।

घ) एकस्मिन् ग्रामे निर्धना स्त्री अवसत् ।

ड.) मम शिशु: त्वया सह नदीं गत: ।

**प्र.14 अधोलिखितश्लोकयो: अन्वयं मञ्जूषात: समुचितपदं चित्वा पूरयत -** **(½×8=4)**

**क)** तुलां लौहसहस्रस्य यत्र खादन्ति मूषका: ।
राजन्तत्र हरेच्छ्येनो बालकं नात्र संशय: ।।

**अन्वय: -** (i)_____ यत्र (ii)_____ तुलां (iii)_____ खादन्ति तत्र श्येन: (iv)_____ हरेत् अत्र संशय: न ।

**ख)** यो मां पुत्रप्रीत्या पोषयति स्वामिनो गृहे तस्य ।
रक्षानियोगकरणान्न मया भ्रष्टव्यमीषदपि ।।

**अन्वय: -** य: पुत्रप्रीत्या (v)_____ पोषयति तस्य (vi)_____ गृहे (vii)_____ कारणात् मया (viii)_____ अपि न भ्रष्टव्यम् ।

**मञ्जूषा -** ईषत्, बालकम्, माम्, मूषका:, रक्षानियोग, स्वामिन:, राजन्, लौहसहस्रस्य

**अथवा**

**अधोलिखितं श्लोकं पठित्वा मञ्जूषाया: पदानि चित्वा भावार्थं पूरयत -**

लतानां नितान्तं सुमं शान्तिशीलम् चलेदुच्छलेत्कान्तसलिलं सलीलम् ।
तवाकर्ण्य वीणामदीनां नदीनाम् निनादय नवीनामये वाणि ! वीणाम् ।।

**भावार्थ:** - हे सरस्वति मात: ! तव (1) ______ वीणानादं श्रुत्वा लतानां (2) ______ शान्तिशीलम् सुमनम् (3) ______ नदीनाञ्च मनोहरं (4) ______अपि उच्छलेत् । अत: हे वाणि ! त्वं नवीनाम् वीणां निनादय ।

**मञ्जूषा -** चलेत्, जलम्, अदीनाम् (ओजपूर्णाम्), नितान्तं

**प्र.15 अधोलिखितवाक्यानि घटनाक्रमानुसारं पुनर्लिखत -** **(½×8=4)**

क) बालिका सूर्योदयात् पूर्वम् एव तत्र उपस्थिता अभवत् ।

ख) यदा सा मञ्जूषां उद्घाटितवती तदा तस्यां महार्हाणि हीरकाणि दृष्ट्वा सा प्रसन्ना जाता ।

ग) यदा काक: शयित्वा प्रबुद्ध: जात: तदा स: स्वर्णगवाक्षात् अवदत् ।

घ) कस्मिंश्चिद् ग्रामे एका निर्धना वृद्धा स्त्री अवसत् ।

ड.) बालिका अकथयत् - अहं ताम्रस्थाल्यामेव भोजनं करिष्यामि ।

च) बालिके ! त्वम् आगता ? तिष्ठ, अहं तव कृते सोपानम् अवतारयामि ।

छ) सा काकं भर्त्सयन्ती अवदत् ।

ज) परं स्वर्णसोपानेन सा स्वर्णभवनम् अगच्छत् ।

**प्र.16 अधोलिखितपदेषु पर्यायपदेन सह मेलनं कृत्वा लिखत -** **(1×4=4)**

| | | | |
|---|---|---|---|
| क) | मरालै: | - | अभिमन्यु: |
| ख) | ततिम् | - | धावन्तम् |
| ग) | सौभद्र: | - | हंसै: |
| घ) | पलायमानम् | - | पंक्तिम् |